शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

काव्यस्य प्रयोजन प्रतिपादनम् ।

काव्यस्य मुख्यं प्रयोजनं चतुर्वर्ग फलप्राप्तिरेव
यथा चोक्तम् —

चतुर्वर्ग फल प्राप्तिः ............. ।
............ तस्य स्वरूपं निरूप्यते ॥

चतुर्वर्ग फलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यम् न रावणादिवत् । इत्यादि कृत्याकृत्य प्रवृत्ति निवृत्युपदेश द्वारेण सुप्रतीतैव । अतएव काव्यस्योपादेयतां लक्षीकृत्य भामहेनोक्तम् —

धर्मार्थ काम मोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्य निषेवणम् ॥

धर्मप्राप्तिः — काव्यतो धर्म प्राप्तिर्हि च भगवन्नारायणचरणारविन्दस्तवादिना । एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति इत्यादि वेद वाक्येभ्यश्च सुप्रसिद्धैव । यथाऽऽदित्य प्रीणयतो मयूरो नाम कविः पापाद् विनिर्मुक्तोऽभूत् ।

अर्थप्राप्तिः — अर्थ प्राप्तिश्च श्री हर्षादिभ्यो धावकादीनां कवीनां प्रसिद्धैवास्ति ।

कामप्राप्तिः — कामप्राप्तिस्तु अर्थद्वारैवेति विदितमेवास्ति ।

मोक्षप्राप्तिः — मोक्षप्राप्तिश्च काव्यजन्य धर्म फलानुसन्धानात् । उक्तं च भगवता श्रीकृष्णेन —
'युक्तः कर्म फलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्' इति
अपि च 'तरति शोकमात्मवित्' इत्यादि ब्रह्मज्ञान-प्रतिपादके मोक्षोपयोगि वाक्ये व्युत्पत्त्याधायकत्वाच्च । काव्योपादेयत्वम् अग्निपुराणेऽपि उक्तम् — नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥ इति
त्रिवर्ग साधनं नाट्यम् इति च ।

विष्णु पुराणेऽपि —
'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः' ॥ इति
एवं काव्योपादेयतायामेतानि वचनानि प्रमाणानि ।

उप-कु-सं 14/7/20
प्रो० प्रो० साहित्य
सं० आ० प० महाविद्यालयेभ्यः
प्रेषितम् ।

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

साहित्यदर्पणः षष्ठः परिच्छेदः

अत्र अर्थप्रकृतयः ? कति च तासां भेदाः । तेषामत्र विवेचनम् ।
प्रकृष्यते प्रयोजनं साध्यते आभिरिति प्रकृतयो हेतवः । अर्थस्य = प्रयोजनस्य, प्रकृतयः = सिद्धिहेतवः इति अर्थप्रकृतयः । ताश्च पञ्च प्रकारा भवन्ति । बीजम्, बिन्दुः, पताका, प्रकरी, कार्यम् इति ।

बीजम् – 'अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥'
अर्थात् यदादौ अङ्कुरितमात्रेण प्रदर्शितं सत् पश्चात् बहुधा = बहुभिः प्रकारैः विस्तारं प्राप्नोति = विविधाकारं कार्याणि जनयति तद् बीजम् इत्यभिधीयते । तच्च नायकमुख्योद्देश्यस्य आदिकारणं भवति । तद् धान्यबीजवत् बीजम् इत्यभिधीयते कविभिः ।
यथा – रत्नावल्यां वत्सराजस्य रत्नावली प्राप्तिहेतुः दैवानुकूल्यलालितो यौगन्धरायणव्यापारः । यथा वा वेणीसंहारे नाटके द्रौपदी केशसंयमन हेतुः भीमसेन क्रोधोपचितो युधिष्ठिरोत्साहः ।

बिन्दुः – 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ।'
अर्थात् अवान्तर कथायाः समाप्तत्वेन सम्भाव्यविच्छेदे प्रधान कथायाः समाप्तत्वेन अविच्छेदस्य यो हेतुः स बिन्दुः । जलतैलबिन्दुवत् प्रसारित्वात् बिन्दुरिति व्यपदेशः । बीजं केवलं मुखसन्धावेव निबध्यते । बिन्दुस्तु सर्वत्रापीति भेदः ।
यथा – रत्नावल्यां अनङ्गपूजा परिसमाप्तौ कार्यार्थविच्छेदे सति 'उदयनस्येन्दोरिवोद्वीक्षते' इति सागरिका श्रुत्वा (सहर्षम्) 'कथं एसो सो उदयणणरिन्दो' इत्यादिरवान्तरार्थहेतुः ।

पताका – 'व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।' इति ।
या प्रासङ्गिककथा सुदूरं निर्वहण सन्धि पर्यन्तं व्याप्नोति सा पताकेति कथ्यते ।
यथा – रामचरिते सुग्रीवादेः, वेणीसंहारे भीमादेः, शाकुन्तले विदूषकस्य चरितम् 'पताका' इति ।

प्रकरी – 'प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता' इति ।
अर्थात् नायकचरिते प्रसङ्गादुपस्थितम् प्रदेशविशेषे स्थितं चरितं = वृत्तान्तः, प्रकरोति नायकवृत्तान्तस्य प्रकर्षं जनयतीति प्रकरी मता । पताकायां प्रासङ्गिकवृत्तस्य बहुदेशव्यापित्वम्, अस्यां तु प्रदेशविशेषव्यापित्वमिति भेदः ।
यथा – कुलपत्यङ्के रावणजटायुसंवादः ।
पताका नायकस्य प्रकरीनायकस्य वा स्वकीयं फलान्तरं न भवति, किन्तु तयोः सर्वोऽपि चेष्टा प्रधान नायकस्य फलसिद्ध्यर्थमेव भवति ।

कार्यम् – 'अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ।
समापनं तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ॥' इति
अर्थात् यत्प्रयोजनं साध्यम् यदुद्देश्यकस्य आरम्भः = उपाये प्रथम प्रवृत्तिः, यस्य सिद्धौ च सामग्री संग्रहः तत् कार्यम् इति उच्यते ।
यथा – रामचरिते रावणवधः ।
इत्यलम् ।

उपेन्द्र झा
14/7/20
सहा० प्रा० साहित्य
रा० उ० सं० महाविद्यालय
कुरसैला, पूर्णियाँ

भारती तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

उपमालङ्कारस्य लक्षणोदाहरण विवेचनम् ।

एकस्मिन्नेव वाक्ये उपमानोपमेययोः वैधर्म्य रहितम् इवादिप्रतिपादितं साम्यं उपमालङ्कारः। सा चोपमा, सामान्य धर्मः = द्वयोः सादृश्य हेतू, गुणक्रिये मनोज्ञत्वादि औपम्यवाचकमिवादि, उपमेयं मुखादि, उपमानं चन्द्रादि यदि वाच्यं भवेत्तदा पूर्णोपमा विज्ञेया । उक्तं च साहित्य दर्पणे —

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।' इति

तथा 'सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यम् ........ ॥' इति

यथा :- 'इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः,
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः,
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥'

अत्र सुरगज उपमानम्, कुमार उपमेयम्, निद्रापगमपूर्वकतल्पत्यागः सामान्य धर्मः, इव शब्दः सादृश्यवाचकः, इति पूर्णोपमालङ्कारस्य उदाहरणम् । सा च श्रौती आर्थी चेति द्विधा । द्विविधाऽपि सा तद्धिते समासे वाक्ये चेति षट्प्रकारा पूर्णोपमा उक्तञ्च —

'श्रौती यथेववा शब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः ॥
द्वे तद्धिते समासेऽथ वाक्ये ........' इति

तत्र श्रौती यथा :- 'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥'

अत्र क्रमेण त्रिविधा श्रौती ।

आर्थी यथा-

'मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥'

अत्र क्रमेण त्रिविधा आर्थी ।

मालोपमा :- एकस्योपमेयस्य यत्र बहूनि उपमानानि उच्यन्ते तत्र मालोपमालङ्कारः । उक्तञ्च —

'मालोपमा यदेकस्योपमानं बहु दृश्यते ।' इति

उदाहरणं यथा :- 'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥'

अत्रोपमेय भूतायाः श्रियः सरसी - निशीथिनी - वनिता रूपानेकोपमानकत्वात् मालोपमालङ्कारः ।

उपेन्द्र झा
14/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
सुरखेना, पूर्णियाँ